# 7 महर्षि दयानन्दः

सौराष्ट्रप्रान्ते टङ्कारानाम्नि ग्रामे श्रीकर्षणतिवारीनाम्नो धनाढ्यस्य औदीच्यविप्रवंशीयस्य धर्मपत्नी शिवस्य पार्वतीव भाद्रमासे नवम्यां तिथौ गुरुवासरे मूलनक्षत्रे एकाशीत्युत्तराष्टादशशततमे (१८८१) वैक्रमाब्दे पुत्ररत्नमजनयत्।

जन्मतः दशमे दिने 'शिवं भजेदयम्' इति बुद्ध्या पिता स्वतसुतस्य मूलशङ्कर इति नाम अकरोत् अष्टमे वर्षे चास्योपनयनमकरोत्। त्रयोदशवर्ष प्राप्तवतेऽस्मै मूलशङ्कराय पिता शिवरात्रिव्रतमाचरितुम् अकथयत्। पितुराज्ञानुसारं मूलशङ्करः सर्वमपि व्रतविधानमकरोत्। रात्रौ शिवालये स्वपित्रा समं सर्वान् निद्रितान् विलोक्य स्वयं जागरितोऽतिष्ठत् शिवलिङ्गस्य चोपरि मूषिक- मेकमितस्ततः विचरन्तं दृष्ट्वा शङ्कितमानसः सत्यं शिवं सुन्दरं लोकशङ्करं शङ्करं साक्षात्कर्तुं हृदि निश्चितवान्। ततः प्रभृत्येव शिवरात्रेः उत्सवः 'ऋषिबोधोत्सवः' इति नाम्ना श्रीमद्दयानन्दानुयायिनाम् आर्यसमाजिनां मध्ये प्रसिद्धोऽभूत।

यदा अयं षोडशवर्षदेशीयः आसीत् तदास्य कनीयसी भगिनी विषूचिकया पञ्चत्वं गता। वर्षत्रयानन्तरमस्य पितृव्योऽपि दिवंगतः। द्वयोरनयोः मृत्युं दृष्ट्वा आसीदस्य मनसि–कथमहं कथंवायं लोकः मृत्युभयात् मुक्तः स्यादिति चिन्तयतः एवास्य हृदि सहसैव वैराग्यप्रदीपः प्रज्वलितः। एकस्मिन् दिवसे अस्तंगते भगवति भास्वति मूलशङ्करः गृहमत्यजत्।

सप्तदशवर्षाणि यावत् अमरत्वप्राप्त्युपायं चिन्तयन् मूलशङ्करः ग्रामाद् ग्रामं, नगरान्नगरं, वनाद् वनं, पर्वतात् पर्वतमभ्रमत् परं नाविन्दतातितरां तृप्तिम्। अनेकेभ्यो विद्वद्भ्यः व्याकरण-वेदान्तादीनि शास्त्राणि योगविद्याश्च अशिक्षत्। नर्मदातटे च पूर्णानन्दसरस्वतीनाम्नः संन्यासिनः सकाशात् संन्यासं गृहीतवान् 'दयानन्दसरस्वती' इति नाम च अङ्गीकृतवान्।

क्रमेण च मथुरानगरादागतेभ्यः जनेभ्यः दण्डिविरजानन्दस्वामिनः पुण्यं यशः श्रावं श्रावं सप्तदशैकोनविंशतिशततमे (१९१७) वैक्रमाब्दे असौ भगवतः श्रीकृष्णस्य जन्मभुवं मथुरानगरीमगच्छत्। तत्र गुरुकल्पवृक्षं, वेदवेदाङ्गप्रवीणं, विलोचनमपि आगमलोचनं, साधुस्वभावं गुरुं विरजानन्दमभ्यगच्छत् भक्त्या प्रणम्य च विद्याध्ययनस्य औत्सुक्यं न्यवेदयत्।

गुरुः विरजानन्दोऽपि कुशाग्रबुद्धिमिमं दयानन्दं त्रीणि वर्षाणि यावत् पाणिनेः अष्टाध्यायीमन्यानि च शास्त्राणि अध्यापयामास। समाप्तविद्यः दयानन्दः परमया श्रद्धया गुरुमवदत्–भगवन् अहम् अकिञ्चनतया तनुमनोभ्यां समं केवलं लवङ्गजातमेव समानीतवानस्मि। अनुगृह्णातु भवान् अङ्गीकृत्य मदीयामिमां गुरुदक्षिणाम्।

प्रीतः गुरुस्तमभाषत–सौम्य! विदितवेदितव्योऽसि, नास्ति किमपि अविदितं तव। अद्यत्वेऽस्माकं देशः अज्ञानान्धकारे निमग्नो वर्तते, नार्यः अनाद्रियन्ते, शूद्राश्च तिरस्क्रियन्ते, अज्ञानिनः पाखण्डिनश्च पूज्यन्ते। वेदसूर्योदयमन्तरा अज्ञानान्धकारं न गमिष्यति। स्वस्त्यस्तु ते, उन्नमय पतितान्, समुद्धर स्त्रीजातिं खण्डय पाखण्डम्, इत्येव मेऽभिलाषः इयमेव च मे गुरुदक्षिणा।

गुरुणा एवम् अज्ञाप्तः महर्षिर्दयानन्दः एतद्देशवासिनो जनान् उद्धर्तुं कर्मक्षेत्रेऽवातरत्। सर्वप्रथमं हरिद्वारे कुम्भपर्वणि भागीरथीतटे पाखण्डखण्डिनीं पताकामस्थापयत्। ततश्च हिमाद्रिं गत्वा त्रीणि वर्षाणि तपः अतप्यत। तदनन्तरमयं प्रतिपादितवान् ऋग्यजुस्सामाथर्वाणो वेदा नित्या ईश्वरकर्तृकाश्च, ब्राह्मण-क्षत्रिय-वैश्य-शूद्राणां गुणकर्मस्वभावैः विभागः न तु जन्मना, चत्वार एव आश्रमाः; ईश्वरः एक एव, ब्रह्म-पितृ-देवातिथि-बलि-वैश्वदेवाः पञ्च महायज्ञाः नित्यं करणीयाः। 'स्त्रीशूद्रौ वेदं नाधीयाताम्' अस्य वाक्यस्य असारताम् प्रतिपाद्य सर्वेषां वेदाध्ययनाधिकारं व्यवस्थापयत। एवमयं पाखण्डोन्मूलनाय वैदिकधर्मसंस्थापनाय च सर्वत्र भ्रमति स्म।

एवमार्यज्ञानमहादीपो देवो दयानन्दः यावज्जीवनं देशजात्युद्धाराय प्रयतमानः तदर्थं स्वजीवनमपि दत्तवान् मुक्तिञ्चाध्यगच्छत्। एवमस्य महर्षेः जीवनं नूनमनुकरणीयमस्ति।

# अभ्यास प्रश्न

## लघु उत्तरीय प्रश्न

१. महर्षेः दयानन्दस्य जन्म कस्मिन् स्थाने अभवत्? [2017 ML
अथवा महर्षेः दयानन्दस्य जन्मभूमिः कुत्र आसीत्? [2020 ZA]
२. दयानन्दः मथुरानगरं किमर्थम् अगच्छत्?
३. मूलशंकर इति नाम कस्य महापुरुषस्य पूर्व नाम आसीत्?
४. महर्षेः दयानन्दस्य जन्म कस्मिन मासे-नक्षत्रे च अभवत्?
५. महर्षेः दयानन्दस्य बाल्यकालिकं किं नाम आसीत्?
६. महर्षेः दयानन्दस्य पितुः नाम किम् आसीत्? [2020 ZF]
७. मूलशङ्करस्य उपनयनं कदा अभवत्? [2020 ZE]
८. मूलशङ्करः कस्याः व्रतम् अकरोत्?
९. शिवलिङ्स्योपरि मूषकं विचरन्तं दृष्ट्वा मूलशङ्करः किम् अचिन्तयत्?
१०. समाप्तविद्यः दयानन्दः गुरवे कां गुरुदक्षिणां समर्पयत्?
११. महर्षेः दयानन्दस्य गुरुः कः आसीत्? [2016 SJ, 17MH, MK]
१२. स्त्रीणां शूद्राणां च कृते दयानन्दः किम् अकरोत्?
१३. दयानन्दः किमर्थं सर्वत्र भ्रमति स्म?
१४. विरजानन्दः कं महानुभावं शास्त्राणि अध्यापयामास?
१५. ज्ञानमयः प्रदीपः केन प्रज्वालितः? [2020 ZE]
१६. विरजानन्दः कस्य गुरुः आसीत्?
१७. गुरोः विरजानन्दस्य प्रमुखः शिष्यः कः असीत्?
१८. मूल शंकरस्य हृदये वैराग्यं कथं उत्पन्नम्?
१९. को गुरुः दयानन्दम् व्याकरणम् अध्यापयामास?
२०. दयानन्दस्य भगिनी कथ पञ्चत्वं गता। [2017 MN]
२१. मूलशङ्करस्य जन्म कुत्र अभवत्? [2018 AH]

## अनुवादात्मक प्रश्न

**१. निम्नलिखित अवतरणों का ससन्दर्भ हिन्दी-अनुवाद कीजिए—**

(क) त्रयोदशवर्षे ........................................ प्रसिद्धोऽभूत्।
(ख) जन्मतः दशमे ................................ हृदि निश्चितवान्।
(ग) यदा अयं षोडश ...................... मूलशंकरः गृहमत्यजत्। [2017 MM, 20 ZG]
(घ) गुरुः विरजानन्दोऽपि................................ गुरुदक्षिणाम्। [2020 ZB, ZE]
(ङ) प्रीतः.................................................... गुरुदक्षिणा। [2019 CM, CQ, CR]
(च) गुरुणा ........................................... ईश्वरः एक एव। [2017 MK, ML]
अथवा गुरुणा एवं ...................................... नित्यं करणीयाः। [2019 CN]
(छ) सप्तदशवर्षाणि यावत्............. इति नाम च अङ्गीकृतवान्। [2016 SL]

२. **निम्नलिखित सूक्तिपरक पंक्ति की ससन्दर्भ हिन्दी-व्याख्या कीजिए–**

स्त्रीशूद्रौ वेदं नाधीयाताम्।

३. **निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए–**

(क) मूलशङ्कर ने शिवरात्रि का व्रत किया।

(ख) उन्होंने वैदिक मत का प्रचार किया।

(ग) पाखण्ड एवं अन्धविश्वास का उन्होंने विरोध किया।

(घ) गुणों के अनुसार वे मनुष्य को श्रेष्ठ मानते थे।

(ङ) आज समाज उनका ऋणी है।

## व्याकरणात्मक प्रश्न

१. **निम्नलिखित शब्दों में सन्धि-विच्छेद कीजिए–**

पार्वतीव, अस्योपनयनम्, प्रभृत्येव, नाविन्दत।

२. **निम्नलिखित शब्दों में शब्द, विभक्ति एवं वचन बताइए–**

नवम्याम्, प्राप्तवते, हृदि, विषूचिकया, करणीयाः।

## शब्दार्थ

**इतस्ततः** = इधर-उधर। **लोकशंकरम्** = लोक का कल्याण करनेवाले। **षोडशवर्षदेशीयः** = करीब सोलह वर्ष के। **ततः प्रभृत्येव** = तब से ही। **कनीयसी** = छोटी। **पञ्चत्वंगता** = मर गयी। **श्रावं-श्रावम्** = बार-बार सुनकर। **यावज्जीवनम्** = जीवन-पर्यन्त। **कुशाग्रबुद्धिम्** = कुशाग्र बुद्धिवाले, तीव्र बुद्धिवाले। **इमम्** = इसको। **अध्यापयामास** = अध्ययन कराया। **अकिञ्चनतया** = निर्धन होने के कारण। **तनुमनोभ्याम्** = शरीर और मन के। **समम्र**= साथ। **अङ्गीकृत्य** = स्वीकार करके। **विदितवेदितव्योऽसि** = (विदितवेदितव्यः + असि) जानने-योग्य बातों को जान गये हो। **अद्यत्व** = आजकल। **स्वस्त्यस्तु** = (स्वस्ति + अस्तु) कल्याण हो। **उन्नमय** = उठाओ। **आज्ञप्तः** = आज्ञा पाये हुए। **पाखण्डखण्डिनीं पताकाम्** = पाखण्ड का नाश करनेवाली ध्वजा को। **ईश्वरकर्तृकाश्च** = (ईश्वरकर्तृकाः + च) और ईश्वरकृत। **प्रतिपाद्य** = प्रतिपादन करके। **नाधीयाताम्** = (न + अधीयाताम्) नहीं पढ़ने चाहिए। **प्रयतमानःर**= प्रयत्न करते हुए। **दत्तवान** = दे दिया।